
प्रकरणमविज्ञातार्थकमिति । अन्येतु एवं कथयन्ति यत् तीर्थकरो हि भगवान् न प्रवचनार्थं प्रयासं करोति किन्तु तीर्थकृतां पुण्यप्रभावादेव श्रोतृणां प्रतिभासो जायते यथा–भगवतेदं तत्त्वमित्थं प्रतिपादितमिति । तदुक्तम्—

तदाधिपत्यादाभासः, सत्त्वानामुपजायते
स्वयं तु यत्नरहित श्चिन्तामणिरिव स्थितः ॥१॥

एतन्मतनिरासार्थमाह–**'जिणक्खायं'** जिनाख्यातम् जिनेन भगवता वर्द्धमानस्वामिना प्रकृष्टतरपुण्यविपाकोदयत स्तथा व्यापारयोगेनाख्यातं कथितमिति जिनाख्यातम् । ततः सफलमेव इदं जिनाख्यातमित्यावेदयन्नाह **'जिणाणुचिण्णं'** जिनानुचीर्णम् अत्र जिनाः हिताप्रतिपातियोगसिद्धाः **'तओ जिणा पण्णत्ता, तं जहा–ओहिनाणजिणा–मणपज्जवनाण जिणा, केवलनाणजिणा'** इति स्थानाङ्गसूत्रवचनात् जिनशब्देनात्र गणधरा गृहीताः । तदय-

---

ज्ञात अर्थवाला नहीं है। कोई २ इस विषय में ऐसा कहते हैं–कि तीर्थंकर भगवान् प्रवचन के लिये प्रयास नहीं करते हैं, किन्तु तीर्थंकरो के पुण्यप्रभाव से ही श्रोताजनो को प्रतिभास होता है । तदुक्तम्—**'तदाधिपत्यादाभासः'** इत्यादि । सो ऐसा कहना भी ठीक नहीं है क्यों कि "जिणक्खायं" पद यह प्रकट करता हैं कि भगवान् वर्द्धमानस्वामी ने ही प्रकृष्टतर पुण्य विपाक के उदय से–तीर्थंकर नामकर्म की प्रकृति के उदय से–ही यह प्रकरण स्वयं अर्थतः कहा है ।

इस **'जिनाख्यात'** विशेषणको सफल प्रकट करनेके लिये सूत्रकारने **'जिणाणुचिण्णं'** यह विशेषण कहा है । जिन तीन प्रकार के कहे गये हैं जैसे–**'तओ जिणा पण्णत्ता तं जहा–ओहि नाणजिणा, मणपज्जवनाणजिणा, केवलनाणजिणा'** ऐसा स्थानांगसूत्र में कहा है । एक अवधिज्ञानीजिन, दूसरे मनः पर्ययज्ञानीजिन, और तीसरे केवलज्ञानीजिन, यहां जिन शब्द से केवल

પ્રકરણ અવિજ્ઞાત અર્થવાળુ નથી. કોઈ કોઈ શાસ્ત્રકારો આ વિષયમાં એવુ પણ કહે છે કે –તીર્થંકર ભગવાન્ પ્રવચનને માટે પ્રયાસ કરતા નથી, પરન્તુ તીર્થંકરોના પુણ્યપ્રભાવથી જ શ્રોતાઓને એવો પ્રતિભાસ થાય છે. કહ્યુ પણ છે કે —

"तदाधिपत्यादाभासः" ઇત્યાદિ—પરતુ એ માન્યતા પણ ઉચિત નથી, કારણ કે– "जिणक्खायं" આ પદ એ વાત પ્રકટ કરે છે કે ભગવાન વર્ધમાન્ સ્વામીએ જ પ્રકૃષ્ટતર પુણ્યવિપાકના ઉદયથી–તીર્થંકર નામકર્મની પ્રકૃતિના ઉદયથી–જ આ પ્રકરણના અર્થનું જાતે જ પ્રતિપાદન કર્યું છે

આ "જિનાખ્યાત" વિશેષણની સાર્થકતા માટે સૂત્રકારે "जिणाणुचिण्णं" વિશેષણનો પ્રયોગ કર્યો છે જિન ત્રણ પ્રકારના કહ્યા છે સ્થાનાંગસૂત્રમાં પણ કહ્યુ છે કે—"तओ जिणा पण्णत्ता–तजहा–ओहिनाणजिणा, मणपज्जवनाणजिणा केवलनाणजिणा'

જિન ત્રણ પ્રકારના છેઃ—

(૧) અવધિજ્ઞાની જિન, (૨) મન; પર્યયજ્ઞાની જિન અને (૩) કેવળજ્ઞાની જિન અહીં જિન પદ દ્વારા માત્ર ગણધરોને જ ગ્રહણ કરવામાં આવેલ છે, કારણ કે ગણધરોમાં મનઃ પર્યય-

मर्थः-जिनैर्हिताप्रतिपातियोगसिद्धैर्गणधरैरनुचीर्णं सम्यक् तदर्थाविगमेनाऽसंगशक्तिगर्भिता निवर्तक-समभावप्राप्त्या समाधिरूपेण परिणमितमिति जिनानुचीर्णम् ॥ अथवा-जिनानुचीर्णमिति, जिनै-रतीतकालिकैरनन्तैः सामान्यकेवल्यादिभिरनुचीर्णम्-आसेवितम् तदनुसेवनादेव तेषां जिनत्वप्राप्तेः ॥ अतएव तादृशसमाधिभावतः संप्राप्तातिशयविशेषप्रभावेण गणधराणां तादृशी सूत्रकरणशक्तिर्भवतीति दर्शयन्नाह-**जिणप्पण्णत्तं**' जिनप्रज्ञप्तम्, जिनैर्हिताप्रतिपातियोगिभिर्गणधरैः प्रज्ञप्तम् स्वेतरजीवा-नुग्रहाय सूत्ररूपेण आचाराद्यङ्गोपाङ्गादिभेदेन रचितमिति जिनप्रज्ञप्तम् तदुक्तम्—

गणधरों का ही ग्रहण किया गया है। क्योंकि गणधरो के मनः पर्ययज्ञान होता है, अतः ये मनःपर्ययज्ञानी जिन कहलाते हैं। ये गणधर हित से अप्रतिपातियोग से सिद्ध होते है। अर्थात् ऐसे योग से ये सिद्ध होते है यो इन्हें हित से प्रतिपात कराने वाला-पीछे हटाने वाला-कोई नहीं होता है। उनके द्वारा यह जिनमत समाधिरूप से परिणमित हुआ है यह समाधि उन्हें समभाव की प्राप्ति से प्राप्त होती है। समभाव की प्राप्ति उन्हे जिनमत के यथार्थज्ञान से प्राप्त असंगशक्ति की प्राप्ति से होती है। अतः इससे वह समभाव उनकी आत्मा से फिर कभी छूटता नहीं है। अथवा-जिनानुचीर्ण शब्द का ऐसा भी अर्थ होता है कि अतीतकाल में जितने भी सामान्यकेवली आदि जिन हो चुके है उनके द्वारा यह जिनमत आसेवित हुआ है। क्योंकि इसी के अनुसेवन से ही उन्हें जिनत्व की प्राप्ति हुई है। अतएव ऐसे समाधिभाव से सप्राप्त अतिशय विशेष के प्रभाव द्वारा गणधरों में ऐसी सूत्र करने की शक्ति आ जाती है कि जिससे वे 'जिणप्प-णत्तं' अपने से इतर जीवों के अनुग्रह के लिये सूत्ररूप से-आचार आदि अङ्गोपाङ्ग आदि के भेद से इस जिनमत की रचना करते हैं।

જ્ઞાનનો સદ્ભાવ હોય છે. આ ગણધરો એવા યોગથી સિદ્ધ થાય છે કે જે યોગ તેમને હિતના માર્ગમાં કદી પણ પાછો હઠાવતો નથી. આ પ્રકારના હિતના માર્ગમા જ દૃઢ રાખનારા યોગને અપ્રતિપાતિયોગ કહે છે. તેમના દ્વારા આ જિનમત સમાધિ રૂપે પરિણમિત થયો છે સમભાવની પ્રાપ્તિ થવાને લીધે આ સમાધિ તેમને પ્રાપ્ત થાય છે જિનમતના યથાર્થ જ્ઞાન દ્વારા પ્રાપ્ત થયેલ અસંગશક્તિ દ્વારા તેમને આ સમભાવની પ્રાપ્તિ થાય છે. તેથી આ સમભાવ તેમના આત્મામાંથી કદી પણ નીકળી જતો નથી અથવા "जिनानुचीर्ण" પદનો આ પ્રકારનો અર્થપણ થઈ શકે છે— ભૂતકાળમા જેટલા સામાન્ય કેવળી આદિ જિન થયા છે તેમના દ્વારા આ જિનમતનુ સેવન થયુ છે, અને તેના આસેવનને લીધે જ તેમણે જિનત્વની પ્રાપ્તિ કરેલી છે તેથી એવા સમાધિભાવથી સંપન્ન અતિશય વિશેષના પ્રભાવ દ્વારા ગણધ-રોમા પણ સૂત્ર રચવાની એવી શક્તિ આવી જાય છે કે જેથી તેઓ "जिणप्पण्णत्तं" અન્ય જીવો પર અનુગ્રહ કરવાને માટે સૂત્ર રૂપે-આચારાગ આદિ અંગોપાંગ રૂપે-જિનમત

'अत्थं भासइ अरिहा सुत्तं गंथंति गणहरा निउणा' इत्यादि, अर्थं भाषते अर्हन् सूत्रं ग्रथ्नन्ति गणधरा निपुणा इतिच्छाया । इदं च शास्त्रं हितप्रवृत्तादिरूपेभ्यो जिनेभ्य एव कथनीयं तेषामेव सम्यग् विनेययोगभावतो हिताप्रतिघातकरणात् एतदेव दर्शयन्नाह—

'जिणदेसियं' जिनदेशितम्, अत्र जिनाहितप्रवृत्तगोत्रविशुद्धोपायाभिमुखापायविमुखादयः शुश्रूषाश्रवणेच्छासपन्ना ते जम्बूस्वाम्यादयः परिगृह्यन्ते तेभ्यो जिनेभ्यो हितप्रवृत्तादिरूपेभ्यः श्रमणेच्छाशुश्रूषादिभिर्व्यक्तभावेभ्यो देशितं--कथितं गणधरैरिति जिनदेशितम् ।

कहा भी है—'अत्थं भासइ अरिहा, सुत्तं गंथंति गणहरा निउणा' इत्यादि। 'जिनदेसियं' यह विशेषण इस जिनमत में यह विशेषता प्रकट करता है कि यह शास्त्र हित में प्रवृत्त हो चुके जिवों के लिये–जम्बूस्वामी आदिकों के लिये–ही कथनीय–कहने योग्य है। क्योंकि उन्होंने ही अच्छे प्रकार से विनेययोग के भाव से हित के विघात करने वाले विवादो का–अनिष्टों का–निवारण किया है। अर्थात्–आत्महित करने में जितने भी बाधक थे उन सबका अपना हित करके उन्होंने निरसन किया है, अतः सच्चे रूप में जिनमत के प्रति विनेययोग ऐसे ही जिनरूप जीवो से साधित हुआ है अर्थात् गणधरो ने यह जिनमत उन्हीं जम्बूस्वामी आदि जिवो के लिये उपदिष्ट किया है कि जिनके भाव इसके सुनते की इच्छा से एवं गुरु आदिकों की शुश्रूषा से इसके प्रति व्यक्त थे और इसी कारण जो अपने हित करने आदि में लगे एवं वंश-परम्परा से विशुद्ध उपायों की ओर जो अभिमुख रहे और अपाय अनर्थरूप अनिष्टो से विमुख हुए।

પ્રદર્શક શાસ્ત્રોની રચના કરે છે. કહ્યું પણ છે કે—"अत्थं भासइ अरिहा, सुत्तं गंथंति गणहरा निउणा" ઇત્યાદિ "जिणदेसियं" આ વિશેષણ જિનમતમાં એવી વિશેષતા પ્રકટ કરે છે કે–આ શાસ્ત્ર હિતમાં પ્રવૃત્તિ થઈ ચુકેલા જિનોને માટે જ–જમ્બૂસ્વામી આદિને માટે જ કહેવા યોગ્ય છે, કારણ કે તેમણે જ સારી રીતે, વિનેયયોગના ભાવ સહિત હિતનો વિઘાત કરનારા વિવાદોનુ –અનિષ્ટોનું-નિવારણ કર્યું છે એટલે કે આત્મહિત કરવાની આડે જે જે વિઘાતક અનિષ્ટો હતાં, તેમનું નિવારણ કરીને તેમણે આત્મહિતની સાધના કરી હતી. એટલે કે એવાં જ જિનરૂપ જીવોએ જિનમત પ્રત્યે વિનેયયોગ સાચા અર્થમાં સાધ્યો હતો એટલે કે ગણધરોએ જ બૂસ્વામી આદિ એવી વ્યક્તિઓની પાસે આ જિન-મતનું કથન કર્યું હતું કે જેઓ ગુરુ આદિની શુશ્રૂષા કરતા થતા આ જિનમતનુ શ્રવણ કરવાને અત્યંત ઉત્કટ ઇચ્છાથી યુક્ત હતા અને આ પ્રકારે પોતાનું આત્મહિત સાધવાને તત્પર થયેલા તેઓ સદા વિશુદ્ધ ઉપાયોમાં પ્રવૃત્ત રહેતા હતા અને અપાયોથી (અનર્થ રૂપ અનિષ્ટોથી) દૂર રહેતા હતા

ननु यदीदं प्रकरणं स्वभावत एवातिसुन्दरं तदा यथा जिनेभ्य उपदिश्यते तथा अजिनेभ्यः कथं नोपदिश्यते इति चेत् तत्राह–अजिनानां स्वतोऽभद्रतयाऽनर्थोपनिपातसभवात्, दृष्टञ्च स्वत· सुन्दरमपि वस्तु पात्रासुन्दरतया असुन्दरं भवति यथा रविकिरणाद्युल्कादितामसजन्तूनाम् अनर्थायैव भवति तदुक्तम्—

पयः पानं भुजङ्गानां केवलं विषवर्द्धनम् ।
उपदेशो हि मूर्खाणां प्रकोपाय न शान्तये ॥ इति ॥

एतस्यैवार्थस्य दर्शनायाह–'जिणप्पसत्थं' जिनप्रशस्तम्, जिनानां गोत्रविशुद्धोपायाभिमुखापायविमुखहितप्रवृत्तादिभेदभिन्नानां प्रशस्तम्–उचितसेवनया हितम् इति जिनप्रश-

---

शंका—जब यह प्रकरण स्वभाव से ही अतिसुन्दर है तो फिर यह जिनों के लिये क्यों उपदिष्ट हुआ है अजिनो के लिये क्यों नहीं ?

उत्तर—अजिनों के लिये यह इस कारण से उपदिष्ट नहीं हुआ है कि वे स्वतः अभद्र होते है इससे उनके द्वारा अनर्थों का उपपात होना यहा संभवित हो सकता है। देखो–जो वस्तु स्वतः सुन्दर होती है वही वस्तु पात्र के दोष से–उसकी असुन्दरता से–असुन्दर बन जाती है जैसे–उल्कादि तामस जन्तुओ को रविकिरण आदि–अनर्थ के लिये ही होती है। तदुक्तम्—'पयः पानं भुजंगानां' इत्यादि दूध जैसी सुन्दर वस्तु सांप के द्वारा पी ली जाने पर वह उसमें विषरूप से ही परिणत होती है। इसी प्रकार से दिया गया उपदेश भी मूर्खों में अनर्थरूप से प्रकोप आदि रूप से–परिणति का कारण बन जाता है। इसी प्रकार कान में गये हुए जल के जैसा गुर्वादिक का उपदेश अभद्र के लिये अशान्ति का कारण बन जाता है। इसी बात की पुष्टि के लिये 'जिणप्पसत्थं' यह

શંકા—આ પ્રકરણ સ્વાભાવિક રીતે જ અતિ સુંદર હોવા છતાં પણ શા માટે જિનોને ઉપદિષ્ટ કરાયું છે, અજિનોને શા માટે ઉપદિષ્ટ કરાયું નથી ?

ઉત્તર—અજિનોને અનુલક્ષીને આ પ્રકરણ ઉપદિષ્ટ કરાયું નથી કારણ કે તેઓ સ્વભાવતઃ અભદ્ર હોય છે, તેથી તેમના દ્વારા અહીં ઉપપાત થવાનો સંભવ રહે છે. એવું જોવામાં આવે છે કે સ્વાભાવિક રીતે જ સુંદર હોય એવી વસ્તુ પણ પાત્રના દોષથી-તેની અસુંદરતાથી અસુંદર બની જાય છે. જેમ કે ઘુવડ આદિ તામસ જંતુઓને સૂર્યના કિરણો લાભને બદલે હાનિ જ કરે છે

"पयः पान भुजङ्गानां" ઈત્યાદિ-દૂધ જેવી સુંદર વસ્તુ સાપને પિવરાવવામાં આવે તો તેને લીધે તેના વિષની જ વૃદ્ધિ થાય છે. આ રીતે અયોગ્ય પાત્ર દ્વારા સેવન થવાને કારણે દૂધ જેવી સુંદર વસ્તુનું પણ વિષમાં પરિણમન થઈ જાય છે. એજ પ્રમાણે અયોગ્ય પાત્રને-મૂર્ખ જનોને-જો ઉપદેશ દેવામાં આવે, તો તે અનર્થ રૂપે-પ્રકોપ આદિ રૂપે-પરિણમે છે. જેમ કાનમા પેસી ગયેલું જળ પીડાકારી થઈ પડે છે, એજ પ્રમાણે અભદ્રને માટે પણ ગુરુ આદિનો ઉપદેશ અશાન્તિનું કારણ બની જાય છે. એજ વાતના સમર્થન માટે

स्तम् । नीरूजपथ्यान्नवत् एतादृशजिनमतम् जिनप्रवचनम् **'अणुव्वीइय'** अनुविचिन्त्य औत्पत्तिकी-पारिणामिक्यादिबुद्धचा विचिन्त्य–पर्यालोच्य **'तं'** तत् जिनमतम् **'सद्दहमाणा'** श्रद्दधानाः–जिन-मते श्रद्धां कुर्वन्तः । यद्यपि कालवैषम्यात् मेधादिगुणहीनाः प्राणिनः तथापि स्वल्पमपि अधि-गतं माषपरिमितचिन्तामणिवत् कल्पवृक्षाङ्कुरवद्वा अनिष्टं विनाश्य स्वर्गापवर्गसुखप्राप्तये भवतीत्यार्द्रचित्ततया मन्यमाना इति भावः । तथा–**'तं'** तत् जिनमतमेव **'पत्तियमाणा'** प्रीयमाणाः असङ्गप्रीत्या विश्वास कुर्वाणाः अथवा परमप्रीतिं जिनवचने कुर्वाणाः परमानुरागतया पश्यन्तः पथ्यौषधिवत् । तथा **'तं'** तत् जिनमतमेव **'रोयमाणा'** रोचयन्तः अमृतमिव स्वात्मरूपेणानुभवन्तः,

---

पद दिया गया है। यह शास्त्र जो गोत्र विशुद्ध उपाय में अभिमुख एवं अनर्थों से विमुख हुए आदि जिनों के–जम्बूस्वामी आदि जिनों के लिये यथाविधि सेवित किये जाने पर हितावह है। जैसा–नीरोग को–पथ्याहार भविष्य में आने वाले रोगो को रोकने वाला होने से हितावह होता है, ऐसा जो यह जिनमतरूप जिनप्रवचन हैं उसका **'अणुव्वीइय'** औत्पत्तिकी पारिणामिकी आदि बुद्धि द्वारा परिशीलन करके **'तं सद्दहमाणा'** उसे अपनी श्रद्धा का विषय बना करके–यह समझ करके कि यद्यपि काल की विषमता से प्राणी मेधादि-गुणों से हीन हो गये है परन्तु फिर भी उनके द्वारा अधिगत हुआ थोड़ा सा भी यह प्रवचन भाषापरिमित चिन्तामणि के जैसा अथवा कल्पवृक्ष के अंकुर के जैसा अनिष्ट का विनाश कर उन्हें स्वर्ग एवं अपवर्ग के सुख की प्राप्ति के लिये होता है ऐसा विशुद्धभाव-रूप रस से आर्द्र (गीले) हुए चित्त से स्वीकार करके तथा–**'तं पत्तियमाणा'** उसे पूर्णरूप से विश्वास में लेकर के अथवा जिनप्रवचन पर पथ्योपधि के जैसा परम अनुराग रखकरके **'तं रोयमाणा'** अमृत के जैसा उसे अपनी रग रग में परिणमा करके **'थेरा भगवंतो'** धर्मपरिणति से

"जिणप्पसत्थं" પદનો પ્રયોગ કરાયો છે જેઓ ગોત્રવિશુદ્ધ ઉપાય (આત્મહિતનો માર્ગ) આચરી રહ્યા છે અને અનર્થોથી દૂર રહેવા પ્રયત્ન કરે છે એવા જંબૂસ્વામી આદિ જિનો દ્વારા વિધિ અનુસાર જેનું સેવન કરવામા આવેલું હતું અને જેના સેવન દ્વારા તેમનું હિત સધાયું હતું એવું આ શાસ્ત્ર પથ્યાહારની જેમ ભવિષ્યના દુઃખોથી રક્ષા કરનારું હોવાથી હિતાવહ છે એવું જે આ જિનમત રૂપ પ્રવચન છે તેનું "अणुव्वीइ य" ઔત્પત્તિકી પારિણામિકી આદિ બુદ્ધિ દ્વારા પરિશીલન કરીને "तं सद्दहमाणा" તેના પ્રત્યે શ્રદ્ધા રાખીને-એવું સમજીને કે કાળની વિષમતાને લીધે માણસો મેધા (બુદ્ધિ) આદિ ગુણોથી રહિત થઈ ગયા છે, છતાં પણ જે તેમના દ્વારા આ પ્રવચનનો થોડો સરખો અંશ પણ ગ્રહણ કરવામા આવે, તે અડદના દાણા જેવડા ચિન્તામણિની જેમ અથવા કલ્પવૃક્ષના અંકુરની જેમઅનિષ્ટનો વિનાશ કરીને તેમને સ્વર્ગ અને મોક્ષની પ્રાપ્તિ કરાવે છે. એવા વિશુદ્ધ ભાવરૂપ રસથી આર્દ્ર થયેલા ચિત્ત વડે સ્વીકાર કરીને તથા તેના પ્રત્યે "पत्तिय-माणा" પૂર્ણ રૂપે વિશ્વાસ રાખીને અથવા જિનપ્રવચન પ્રત્યે પથ્ય ઔષધિના જેવો પરમ

इष्टभोजनवत्, के इत्थं भूता स्तत्राह–'थेरा' इति 'थेरा भगवंतो' स्थविराः भगवन्तः तत्र धर्मपरिणत्या परिनिष्ठितमतयः स्थविरा इव स्थविराः ज्ञानस्थविराः परिणतसाधुभावाः आचार्या इत्यर्थः श्रुतैश्वर्यादिसबन्धात् भगवन्तः 'जीवाजीवाभिगमणामं' जीवाजीवाभिगमनाम जीवानाम्–एकेन्द्रियादीनाम् अजीवानां धर्मास्तिकायादीनाम् अभिगमः–परिच्छेदो यस्मिन् तत् जीवाजीवाभिगमं नाम्ना ? किं तत् 'अज्झयणं' अध्ययनम् अधीयते–पठ्यते इति अध्ययनविशिष्टार्थध्वनिसमुदायात्मकम् 'पण्णवइंसु' प्राज्ञापयन् प्रज्ञापितवन्तः–प्ररूपितवन्तः ॥ सू० १ ॥

मूलम्–'से किं तं जावाजीवाभिगमे, जीवाजीवाभिगमे दुविहे पन्नत्ते, तंजहा–जीवाभिगमे य अजीवाभिगमे य' ॥ सू० २ ॥

छाया–अथ कोऽसौ जीवाजीवाभिगमः, जीवाजीवाभिगमो द्विविधः प्रज्ञप्तः, तद्यथा–जीवाभिगमश्च अजीवाभिगमश्च ॥ सू० २ ॥

टीका–'से किं तं जीवाजीवाभिगमे' अथ कोऽसौ जीवाजीवाभिगमः, इदं च प्रश्न

परिनिष्ठित मतवाले स्थविर–स्थविरों की तरह स्थविरों ने-ज्ञानस्थविरो ने परिणत साधु भाववाले आचार्यों ने श्रुतिरूप ऐश्वर्य से सपन्न होने से भगवन्तों ने अर्थात् स्थविर भगवन्तो ने 'जीवाजीवाभिगमणामं' जीवाजीवाभिगनामका 'अज्झयणं' अध्ययन 'पण्णवइंसु' प्ररूपित किया है। इसमें एकेन्द्रियादि जीवों का एवं धर्मास्तिकायादिक अजीवो का परिच्छेद–बोध है अतः इस प्रकरण को 'जीवाजीवाभिगमे' इस सार्थक नाम से विशिष्ट किया गया है तथा यह विशिष्ट अर्थध्वनि के समुदायरूप है इसलिये इसे 'अध्ययन' इस नाम से भी कहा गया है ॥ सू० १ ॥

'से किं तं जीवाजीवाभिगमे'—इत्यादि।

टीकार्थ—हे भदन्त ! 'से किं तं जीवाजीवाभिगमे'–अथ कोऽसौ जीवाजीवाभिगम.'

અનુરાગ રાખીને "त रोयमाणा" અમૃતની જેમ તેને પોતાની રગે રગમાં ઉતારીને "थेरा भगवंतो" ધર્મપરિણતિ વડે પરિનિષ્ઠિત મતિવાળા સ્થવિરોએ-જ્ઞાન સ્થવિરોને, પરિણત સાધુભાવવાળા આચાર્યોએ-શ્રુતરૂપ ઐશ્વર્યથી સંપન્ન એવા સ્થવિર ભગવન્તોએ "जीवाजीवाभिगमणामं" જીવાજીવાભિગમ નામનું "अज्झयणं" અધ્યયન "पण्णवइंसु" પ્રરૂપિત કર્યું છે. તેમાં એકેન્દ્રિય આદિ જીવોનું અને ધર્માસ્તિકાયાદિ અજીવોનું પ્રતિપાદન કરવામાં આવ્યું છે. તેથી આ પ્રકરણને 'જીવાજીવાભિગમ' આ સાર્થક નામ આપવામાં આવ્યું છે, તથા વિશિષ્ટ અર્થધ્વનિના સમુદાય રૂપ હોવાને કારણે આને "અધ્યયન" નામ પણ આપવામાં આવ્યું છે. ॥ સૂ૦ ૧ ॥

"से किं तं जीवाजीवाभिगमे" ઇત્યાદિ–

ટીકાર્થ—"से किं तं जीवाजीवाभिगमे"—અથ કોઽસૌ જીવાજોવાભિગમઃ ?"

सूत्रम्, एतत्सूत्रमादौ उपन्यस्यन्निदं सूचितं भवति प्रश्नं कुर्वतो मध्यस्थस्य बुद्धिमतः श्रीमदर्हदुपदिष्टस्यैव तत्त्वप्ररूपणा कर्तव्या नान्यस्येति । अत्र 'से' शब्दो मगधदेशप्रसिद्धो निपातोऽथ शब्दस्य अर्थे विद्यते अथ शब्दश्चाभिधेयपदार्थवाचकः, तदुक्तम्–अथ प्रक्रियाप्रश्नानन्तर्यमङ्गलोपन्यासप्रतिवचनसमुच्चयेषु विद्यते इति । एतेषु अथ शब्दार्थेषु प्रकृते अथ शब्द उपन्यासे, किं शब्दश्च परप्रश्ने, तथा च अथ किं तज्जीवाजीवाभिगमः पर्यवसितः ।

अथवा–'से किं तं' इत्यस्य प्राकृतशैल्या अभिधेयवत् लिङ्गवचनानि भवन्तीति न्यायात् किं तत् इति कोऽसौ इत्यस्मिन्नर्थे द्रष्टव्यम् ततश्चायमर्थः सपद्यते कोऽसौ जीवाजीवाभिगम इति प्रश्नः, एवंप्रकारेण सामान्यतः केनचित् प्रश्ने कृते सति भगवान् गुरु शिष्यवचनानुरोधेन शिष्यस्यादरार्थं हे शिष्य ! इति सम्बोधनं प्रत्युच्चार्याह–'**जीवाजीवाभिगमे**' इत्यादि, '**जीवाजीवाभिगमे दुविहे पन्नत्ते**' **जीवाजीवभिगमः**-जीवाजीवविषयको बोधः द्विविधः द्विप्रकारकः प्रज्ञप्तः-कथितस्तीर्थंकरगणधरैरिति । प्रकारभेदमेव दर्शयति–'**तं जहा**' इत्यादि '**तं जहा**' तद्यथा–स जीवाजीवाभिगमो यथा द्विप्रकारको भवति तथोपन्यस्यते इति भावः ।

'**जीवाभिगमे य अजीवाभिगमे य**' जीवाभिगमश्च अजीवाभिगमश्च अत्र विद्यमानौ च शब्दौ-

---

जीवाभिगम और अजीवाभिगम का क्या स्वरूप है ? यह प्रश्न सूत्र है, इसे आदि में रखने वाले सूत्रकार ने यह सूचित किया है कि जो प्रश्न करने वाला शिष्य बुद्धिमान् एवं मध्यस्थ होता है उसके प्रति ही श्रीमदर्हदुपदिष्ट तत्त्व की प्ररूपणा करनी चाहिये अन्य के लिये नहीं । यहां हे भगवन् यह जीवाजीवाभिगम क्या है' ऐसा प्रश्नार्थ हो जाता है, इस प्रकार सामान्य रूप से किसी शिष्य के द्वारा प्रश्न किये जाने पर भगवान् गुरु शिष्य के वचन के अनुसार उसके पूछने के अनुसार उसका आदर करते हुए 'हे शिष्य' इस प्रकार से सम्बोधन करके उससे कहते हैं–'**जीवाजीवाभिगमे दुविहे पन्नत्ते**' जीवाजीवाभिगम दो प्रकार का कहा गया है । '**तं जहा**' जैसे–'**जीवाभिगमे य अजीवाभिगमेय**' एक जीवाभिगम और दूसरा अजीवाभिगम । यहां जो दो 'च'

"હે ભગવન્ ! જીવાભિગમ અને અજીવાભિગમનું સ્વરૂપ કેવું છે ?" આ પ્રશ્ન સૂત્ર છે. પ્રારંભમાં થી આ પ્રશ્નસૂત્ર લખીને સૂત્રકારે એ સૂચિત કર્યું છે કે પ્રશ્ન પૂછનાર જે શિષ્ય બુદ્ધિશાળી અને મધ્યસ્થ હોય તેની સમક્ષ જ અર્હંત ભગવાન્ દ્વારા પ્રરૂપિત પ્રરૂપણા કરવી જોઈએ–અન્યની સમક્ષ કરવી જોઈએ નહીં. "હે ભગવન્ ! જીવાજીવાભિગમ શું છે ?" એવું પ્રશ્નસૂત્ર અહીં આપવામાં આવ્યું છે. આ પ્રકારે કોઈ શિષ્ય દ્વારા સામાન્ય રૂપે પ્રશ્ન પૂછવામાં આવે છે, ત્યારે ગુરુ "હે શિષ્ય !" આ પ્રકારના સંબોધન દ્વારા તેનો આદર કરીને પ્રશ્નને અનુરૂપ જવાબ આપે છે. અહીં તે જવાબ નીચે પ્રમાણે આપવામાં આવ્યો છે—"जीवाजीवाभिगमे दुविहे पन्नत्ते" જીવાજીવાભિગમ બે પ્રકારનો કહ્યો છે. "तंजहा" તે પ્રકારો નીચે પ્રમાણે છે–"जीवाभिगमे य, अजीवाभिगमे य" (૧) જીવાભિગમ અને (૨) અજીવાભિગમ. અહીં જે બે "च" નો પ્રયોગ કરવામાં આવ્યો છે, તે

वस्तुतत्त्वमङ्गीकृत्य द्वयोर्जीवाभिगमाजीवाभिगमयोः समानरूपतां दर्शयतः द्वावपि पदार्थौ प्रधानौ एव न तु एको मुख्योऽपरश्च गौण इति । न तु प्रश्नसूत्रे जीवाभिगमाजीवाभिगमः सम्बलित एवकथितस्तथैव उत्तरवाक्येऽपि मिलितयोरेव जीवाभिगमाजीवाभिगमयोरुच्चारणमुत्तरेऽपि आवश्यकम् असम्बलिते सम्बलितविधानस्य अयुक्तत्वादिति चेदत्रोच्यते—प्रश्नसूत्रेऽपि असम्बलितयोरेव-जीवाभिगमाजीवाभिगमयोरेव उपन्यासादिति प्रश्नसूत्रेऽपि कः जीवाभिगमः कश्चाजीवाभिगम-इत्येवं रूपेण पार्थक्येनैव प्रश्नः समर्थनीयः ॥ सू० २ ॥

यद्यपि यथोद्देशस्तथा निर्देश इति न्यायेन उद्देशसूत्रे जीवस्य प्राथम्यात् निर्देशसूत्रेऽपि जीवाभिगमस्यैव निर्देशो युक्त स्तथापि अजीवाभिगमे अल्पतरवक्तव्यत्वात् प्रथमतः जीवाभिगम कथयितुं

का पाठ आया है वह इस बात का प्रदर्शक है कि जीवाभिगम और अजीवाभिगम ये दोनो वास्तविक पदार्थ है । इसलिये ये दोनो ही प्रधान है । ऐसा नहीं है कि एक प्रधान है और दूसरा गौण है ।

शंका—प्रश्नसूत्र मे 'जीवाजीवाभिगमे' ऐसा मिला हुआ ही पाठ कहा गया है और उत्तरवाक्य में भी 'जीवाजीवाभिगमे' ऐसा ही मिला हुआ पाठ कहा है, परन्तु आपके उत्तर से तो यह प्रतीत होता है कि यह पाठ सवलित (मिला हुआ) नहीं है असंवलित-जुदाजुदा है, तो फिर असंवलित में सम्वलित का विधान करना उचित नहीं है ?

उत्तर—प्रश्न सूत्र में भी असंवलित जीवाभिगम और अजीवाभिगम का ही पाठ है ऐसा जानना चाहिये, अर्थात् जीवाभिगम क्या है ? और अजीवाभिगम क्या है ? ऐसा भिन्न भिन्न रूप से ही प्रश्न पूछा गया है, और उत्तर वाक्य में भी ऐसा ही उत्तर दिया गया है । अतः असंवलित में सम्वलित का विधान नहीं किया गया है, ऐसा ही जानना चाहिये ॥ सू० २ ॥

એ વાત પ્રકટ કરે છે કે જીવાભિગમ અને અજીવાભિગમ, આ બન્ને વાસ્તવિક પદાર્થો છે તેથી તે બન્ને પ્રધાન જ છે તે બન્નેમાં કોઈ એક પ્રધાન છે અને કોઈ એક ગૌણ છે, એવું નથી.

શંકા—પ્રશ્નસૂત્રમાં તો "જીવાજીવાજીવાભિગમે" સંમિલિત પાઠ જ છે ઉત્તરસૂત્રમાં પણ "જીવાજીવાભિગમે" એવો સંમિલિત પાઠ જ આપ્યો છે. પરંતુ આપના ઉત્તરથી તો અહીં એવું લાગે છે કે આ પાઠ અહીં સંમિલિત નથી, પણ અલગ અલગ છે. તો શું આ પ્રકારે સંમિલિતને બદલે અસંમિલિતનું વિધાન કરવું તે ઉચિત છે બરુ ?

ઉત્તર—પ્રશ્નસૂત્રમાં પણ અસંમિલિત (અલગ અલગ) જીવાભિગમ અને અજીવાભિગમનો જ પાઠ છે, એમ સમજવું જોઈએ એટલે કે 'જીવાભિગમ શું છે ? અને અજીવાભિગમ શું છે ?, એવા ભિન્ન ભિન્ન પ્રશ્નો જ આપવામાં આવ્યા છે. તેથી અસંમિલિતમાં સંમિલિતનું વિધાન થયું નથી, એવું જ સમજવું જોઈએ. ॥ સૂ૦ ૨ ॥

सन्निकटाभिधानेन अजीवाभिगमप्रश्नसूत्रमाह 'सेकिं तं अजीवाभिगमे' इत्यादि ।

मूलम्—'से किं तं अजीवाभिगमे. अजीवाभिगमे दुविहे पन्नत्ते. तं जहा रूविअजीवाभिगमे य अरूविअजीवाभिगमे य ॥ सू० ३ ॥ से किं तं अरूविअजीवाभिगमे ! अरूवि अजीवाभिगमे दसविहे पन्नत्ते तंजहा धम्मत्थिकाए एवं जहा पण्णवणाए जाव से तं अरूवि अजीवाभिगमे ॥ सू० ४ ॥ से किं तं रूवि अजीवाभिगमे रूवि अजीवाभिगमे चउव्विहे पन्नत्ते तं जहा—खंधा खंधदेसा खंधपएसा परमाणुपोग्गला. ते समासओ पंचविहा पन्नत्ता. तं जहा—वण्णपरिणया गंधपरिणया रसपरिणया फासपरिणया संठाणपरिणया एवं ते पंच जहा पण्णवणाए भेत्तं रूविअजीवाभिगमे से त्तं अजीवाभिगमे' ॥ सू० ५ ॥

छाया—अथ कोऽसौ अजीवाभिगमः, अजीवाभिगमो द्विविधः प्रज्ञप्तः तद्यथा-रूपि अजीवाभिगमश्च अरूपि अजीवाभिगमश्च ॥ सू० ३ ॥ अथ कोऽसौ अरूपि अजीवाभिगमः ? अरूपि अजीवाभिगमो दशविधः प्रज्ञप्तः. तद्यथा-धर्मास्तिकाय एवं यथा प्रज्ञापनायां यावत् सोऽयमरूपि अजीवाभिगमः ॥ सू० ४ ॥ अथ कोऽसौ रूपि अजीवाभिगमः. रूपि अजीवाभिगमः चतुर्विधः प्रज्ञप्तः., तद्यथा-स्कन्धाः स्कन्धदेशाः, स्कन्धप्रदेशाः , परमाणुपुद्गलाः. ते समासतः पञ्चविधाः प्रज्ञप्ताः तद्यथा-वर्णपरिणताः, गन्धपरिणताः , रसपरिणताः, स्पर्शपरिणताः संस्थानपरिणताः, एवं ते पञ्च यथा प्रज्ञापनायाम् , सोऽयं रूपि अजीवाभिगम , सोऽयमजीवाभिगमः ॥ सू० ५ ॥

अर्थात् 'अथ' शब्द मंगल होता है ऐसा भी निर्देश होता है ऐसा नियम है—अतः इस नियम के अनुसार ही सूत्रकार ने भी जीवाभिगम का ही निर्देश पहिले करना चाहिये था परन्तु ऐसा नहीं किया है अतः सन्निकटाभिधान होने से सन्निकटाभिधान के अनुसार अजीवाभिगम संबंधी प्रश्नसूत्र का कथन करते हैं—

અર્થાત્ 'અથ' શબ્દ મંગલ રૂપ હોય છે, એવા જે નિર્દેશ હોવો જોઈએ, એવો નિયમ છે. આ નિયમ અનુસાર અહીં સૂત્રકારનો જે નિર્દેશ પહેલા કરવો જોઈતો હતો, પરન્તુ તે પ્રમાણે કર્યું નથી, પણ પછીથી કર્યું છે પરન્તુ અજીવાભિગમમાં વક્તવ્યતા ઘણી ઓછી છે, એમ જોઈને તેમણે સન્નિકટાભિધાન ન્યાય અનુસાર અહીં જીવાભિગમનું પ્રશ્ન સૂત્ર પહેલાં અજીવ અભિગમનું કથન પહેલાં કર્યું છે—

टीका—'से किं तं अजीवाभिगमे' अथ कोऽसौ अजीवाभिगमः के अरूपि अजीवा इति प्रश्नः उत्तरयति–'अजीवाभिगमे दुविहे पन्नत्ते' अजीवाभिगमो द्विविधो-द्विप्रकारकः प्रज्ञप्तः कथितः प्रकारभेदमेव दर्शयति–तं जहा तद्यथा–'रूवि अजीवाभिगमे य अरूवि अजीवाभिगमे य' रूपि अजीवाभिगमश्च अरूपि अजीवाभिगमश्च रूपं कालनीलादिवर्णो विद्यते येषां ते रूपिणः अत्र रूपपदं गन्धरसस्पर्शानामपि उपलक्षकम् गन्धादीनामभावे रूपस्यासंभवात् अन्योऽन्यमिलिताः सर्वे सर्वत्र गामिनो भवन्ति प्रतिपरमाणुवर्णगन्धरसस्पर्शा भवन्त्येवेति तदुक्तम्–

कारणमेव तदन्त्यं सूक्ष्मो नित्यश्च भवति परमाणुः ।
एकरसगन्धवर्णो द्विस्पर्शः कार्यलिंगश्च । इति ॥

'से किं तं अजीवाभिगमे'—इत्यादि ॥ सू० ३–५ ॥

टीकार्थ—'से किं तं अजीवाभिगमे' हे भदन्त ! अजीवाभिगम क्या है–अर्थात् अजीवाभिगम का क्या स्वरूप है ? उत्तर में प्रभु कहते है–'अजीवाभिगमे दुविहे पन्नत्ते' हे गौतम ! अजीवाभिगम दो प्रकार का कहा गया है 'तं जहा'—जैसे–'रूविअजीवाभिगमे य अरूवि अजीवाभिगमे य' रूपि अजीवाभिगम और अरूपी अजीवाभिगम, जिनमें कृष्ण, नील आदि वर्ण रहते हैं–वे रूपी हैं यहां रूपपद गन्ध, रस, स्पर्श इनका भी उपलक्षक है। क्योंकि गन्धादिक के अभाव में स्वतन्त्ररूप से रूप का सद्भाव कहीं भी नहीं पाया जाता है। परस्पर में ये सब मिलकर ही सर्वत्र जाने के स्वभाव वाले है। यहां तक कि हर एक परमाणु में वर्ण, गन्ध, रस और स्पर्श होते हैं–कहा भी है—'कारणमेव तदन्त्यम्' इत्यादि।

"से किं तं अजीवाभिगमे" ઇત્યાદિ સૂ. ૩.. ૫

ટીકાર્થ— પ્રશ્ન "से किं तं अजीवाभिगमे ?" હે ભગવન્ ! અજીવાભિગમનું સ્વરૂપ કેવું છે ? તેનો ઉત્તર આપતાં પ્રભુ કહે છે કે—"अजीवाभिगमे दुविहे पण्णत्ते तंजहा" હે ગૌતમ ! અજીવાભિગમના નીચે પ્રમાણે બે પ્રકાર કહ્યા છે—"रूवि अजीवाभिगमे य, अरूवि अजीवाभिगमे य" (૧) રૂપી અજીવાભિગમ અને (૨) અરૂપી અજીવાભિગમ. જેમાં કૃષ્ણ, નીલ આદિ વર્ણનો સદ્ભાવ હોય છે, તેઓ રૂપી છે. અહીં રૂપ પદ ગંધ, રસ, અને સ્પર્શનું પણ ઉપલક્ષક છે, કારણ કે ગંધાદિનો અભાવ હોય તો સ્વતંત્ર રૂપે રૂપનો સદ્ભાવ કદી પણ સંભવી શકતો નથી ગંધ, રસ, સ્પર્શ અને વર્ણ આ ચારેનો પરસ્પરની સાથે સંયોગ થાય ત્યારે જ તે રૂપી પદાર્થમાં સર્વત્ર ગમન કરવાનું લક્ષણ સંભવી શકે છે. પ્રત્યેક પરમાણુમાં વર્ણ, ગંધ, રસ અને સ્પર્શનો સદ્ભાવ જ હોય છે. કહ્યું પણ છે કે—"कारणमेव तदन्त्यम्" ઇત્યાદિ

एतावता भिन्ना एव रूपपरमाणवो भिन्नाश्च रसादिपरमाणवः, इति येषां कथनं तन्निराकृतं भवति प्रत्यक्षबाधात् तथाहि-यत्रैव घटादौ रूपपरमाणवः प्रतीयन्ते तेष्वेव सर्वेष्वपि स्पर्शोऽपि उपलभ्यते एव, एवं यत्रैव घृतादौ रसपरमाणवः कर्पूरादिगन्धपरमाणवो वा समुपलभ्यन्ते तेष्वेव घृतकर्पूरादिषु नैरन्तर्येण रूप स्पर्शश्च उपलब्धिविषयो भवत्येव, अन्यथा एकस्य सत्त्वेऽपरस्यासत्त्वे सान्तरास्ते प्रतीयेरन् न च सान्तरास्ते रूपादयः प्रतीयन्ते तस्मादपि अतिरेकः परस्परं रूपादीनामिति। रूपिणश्च ते अजीवाश्च इति रूप्यजीवा स्तेषामभिगमो रूप्यजीवाभिगमः पुद्गलरूपा जीवा इति भाव'। पुद्गलानामेव रूपादिमत्तया उपलम्भादिति। रूपि-

---

एतावता-जो ऐसा कहते है 'कि रूप परमाणु से भिन्न हैं, रसादि परमाणु भिन्न हैं' सो यह उनका कथन निराकृत हो जाता है। क्योंकि इस प्रकार के कथन में प्रत्यक्ष प्रमाण से बाधा आती है। इसका स्पष्ट विवेचन इस प्रकार से है—जिस घटादि में रूपपरमाणु प्रतीत होते हैं उन्हीं समस्त परमाणुओ में स्पर्श भी उपलब्ध होता हैं, इसी प्रकार जिस घृत आदि पदार्थ में रस परमाणु अथवा कपूर आदि में गन्ध परमाणु पाये जाते है उन्ही परमाणुओ में वहां रूप और स्पर्श भी उपलब्धि का विषय होता है। जो ऐसा न माना जाय और ऐसा ही माना जाय कि एक के सद्भाव में ऊपर का असद्भाव रहता है तो उनकी प्रतीति सान्तर रूप से होनी चाहिये, परन्तु रूपादिको की सान्तर-रूप से प्रतीति तो होती नहीं है नैरन्तर्यरूप से ही प्रतीति होतीहै अतः ऐसा ही मानना चाहिये कि जहां एक का सद्भाव है वहां शेष तीन का भी सद्भाव है। रूपी जो अजीव हैं वे रूप्य जीव पदार्थ हैं। इनका जो अभिगम है वह रूप्यजीवाभिगम है। ऐसा यह रूप्य-

---

આ કથન દ્વારા "રૂપ પરમાણુ ભિન્ન છે, રસાદિ પરમાણુ ભિન્ન છે," આ પ્રકારની માન્યતા ધરાવનારા લોકોની માન્યતાનુ ખંડન થઈ જાય છે, કારણ કે આ પ્રકારનું કથન સ્વીકારવામાં આવે, તો પ્રત્યક્ષ પ્રમાણમાં જ બાધા આવી જાય છે, તેનુ સ્પષ્ટીકરણ નીચે પ્રમાણે છે—જે ઘટાદિમાં રૂપ પરમાણુ વિદ્યમાન હોય છે, તે સઘળા પરમાણુઓમાં સ્પર્શનો પણ સદ્ભાવ હોય છે. એજ પ્રમાણે ઘી આદિ પદાર્થોમાં રસપરમાણુ વિદ્યમાન હોય છે. અને કપૂર આદિમાં ગંધપરમાણુ વિદ્યમાન હોય છે, તે પદાર્થોના એજ પરમાણુઓમા રૂપ અને સ્પર્શનો પણ સદ્ભાવ હોય છે. જો એવું ન માનવામાં આવે, અને એવું જ માનવામાં આવે કે કોઈ એકનો સદ્ભાવ હોય ત્યારે અન્યનો અસદ્ભાવ હોય છે, તો તેમની પ્રતીતિ સાન્તર રૂપે થવી જોઈએ; પરન્તુ રૂપાદિકોની સાન્તરરૂપે પ્રતીતિ તો થતી નથી, નૈરન્તર્ય રૂપે જ પ્રતીતિ થાય છે. તેથી એવું જ માનવું પડશે કે જ્યાં એકનો સદ્ભાવ હોય ત્યાં બાકીના ત્રણેનો સદ્ભાવ જ હોય છે. રૂપી પદાર્થો કે જે અજીવ છે, તેમને રૂપ્યજીવ પદાર્થો કહે છે. તેમનો જે અભિગમ છે તેને રૂપ્યજીવાભિગમ કહે છે. એવો આ રૂપ્યજીવાભિગમ પુદ્ગલ અજીવ રૂપ હોય છે. એટલે કે પુદ્ગલ રૂપ અજીવ જ

भिन्ना अरूपिणो धर्मास्तिकायादयः ते च ते अजीवाश्चेति अरूप्यजीवा स्तेषामभिगमोऽरूप्य-जीवाभिगम इति । सू० ३ । अरूपिणोऽजीवा धर्मास्तिकायादयः केवलमागमप्रमाणसवेद्या स्तत्त्वत इति प्रथमतोऽरूप्यजीवाभिगमविषयकमेव प्रश्नसूत्रमाह–से किं तं' इत्यादि **'सेकिंतं अरूवि अजीवाभिगमे'** अथकोऽसौ अरूप्यजीवाभिगम इति प्रश्नः, उत्तरयति–**अरूवि अजीवाभिगमे दसविहे पन्नत्ते'** अरूप्यजीवाभिगमो दशविधः दशप्रकारकः प्रज्ञप्तः–कथितः तमेव दशविध-भेदं दर्शयितुमाह–तं जहा' इत्यादि **'तंजहा'** तद्यथा **'धम्मत्थिकाए'** धर्मास्तिकायः **'एवं जहा पण्णवणाए जाव सेत्तं अरूवि अजीवाभिगमे'**एव यथा प्रज्ञापनायां यावत् सोऽयमरूप्यजीवा-

जीवाभिगम पुद्गल अजीव रूप होता है। अर्थात् पुद्गलरूप अजीव ही रूप्यजीव है। क्योकि रूप, रस, गन्ध और स्पर्श इन गुणो से युक्त पुद्गलों की ही उपलब्धि होती है। अन्य द्रव्यो की नहीं। पुद्गल से भिन्न जो अरूपी धर्मास्तिकाय आदि हैं, वे अरूपी अजीव है। इनका जो अभिगम है वह अरूप्यजीवाभिगम है ॥ सू० ३ ॥

ये अरूपी अजीव धर्मास्तिकायादिक केवल आगम प्रमाण से ही सवेद्य है–अतः सूत्रकार ने अरूप्यजीवाभिगम विषयक ही प्रश्नसूत्र सर्वप्रथम कहा है–इसमें प्रश्न कर्त्ता ने यही पूछा है **'से किंतं अरूवि अजीवाभिगमे'** हे भदन्त। अरूपी अजीवाभिगम क्या है ? अर्थात् अरूपी अजीवाभिगम कितने प्रकार का है ? उत्तर में कहा गया है–**'अरूवि अजीवाभिगमे दसविहे पन्नत्ते'** अरूपी अजीवाभिगम दश प्रकार का है—तं जहा" जैसे **'धम्मत्थिकाए एवं जहा पण्णवणाए जाव से तं अरूवि अजीवाभिगमे'** धर्मास्तिकाय इत्यादि-इस दश प्रकार के अजीवाभिगमका कथन जिस रूप से प्रज्ञापना मे किया गया है ? उसी रूप से यहाँ पर भी यावत् **'से तं अरूवि अजीवा-**

રૂપ્યજીવ (રૂપીઅજીવ) છે, કારણ કે રૂપ, રસ, ગંધ અને સ્પર્શ આ ગુણોથી યુક્ત પુદ્ગલોની જ ઉપલબ્ધિ થાય છે–અન્ય દ્રવ્યોની નહીં. પુદ્ગલથી ભિન્ન એવાં જે ધર્માસ્તિકાય આદિ અરૂપી પદાર્થો છે, તેમને અરૂપી અજીવ કહે છે. તેમનો જે અભિગમ છે તેને 'અરૂપી અજીવાભિગમ' કહે છે. ॥ સૂ૦ ૩ ॥

આ ધર્માસ્તિકાય આદિ અરૂપી અજીવોનો અનુગમ આગમપ્રમાણ વડે જ થઈ શકે છે. તેથી સૂત્રકારે અરૂપી અજીવાભિગમ વિષયક પ્રશ્ન સૂત્રનું સૌથી પહેલાં પ્રતિપાદન કર્યું છે આ વિષયને અનુલક્ષીને એવો પ્રશ્ન પૂછવામાં આવ્યો છે કે–"**से किं तं अरूवि अजीवाभिगमे ?**" હે ભગવન્ ! અરૂપી અજીવાભિગમનું સ્વરૂપ કેવું છે ? એટલે કે તેના કેટલા પ્રકાર કહ્યા છે ?

ઉત્તર—"**अरूवि अजीवाभिगमे दसविहे पन्नत्ते–तं जहा**" અરૂપી અજીવાભિગમ દસ પ્રકારનો કહ્યો છે જે પ્રકારો નીચે પ્રમાણે છે–"**धम्मत्थिकाए, एवं जहा पण्णवणाए जाव से तं अरूवि अजीवाभिगमे**" ધર્માસ્તિકાય આદિ દસ પ્રકારના અરૂપી અજીવાભિગમનું પ્રજ્ઞાપનાસૂત્રમાં જેવું કથન કરવામાં આવ્યું છે, એવું જ કથન અહીં પણ 'से तं अरूवि

भिगम इति एवम् उक्तप्रकारेण यथा येन रूपेण प्रज्ञापनायां कथितं तथा तेनैव रूपेण अत्रापि वक्तव्यं तावत्पर्यन्त यावत् 'सेत्तं' सोऽयम् अरूप्यजीवाभिगमः इति, प्रज्ञापनाप्रकरणं चैवम्- **'धम्मत्थिकाए धम्मत्थिकायस्सदेसे धम्मत्थिकायस्स पएसा, अधम्मत्थिकाए अधम्मत्थिकायस्स देसे अधम्मत्थिकायस्स पएसा, आगासत्थिकाए आगासत्थिकायस्स देसे आगासत्थिकायस्स पएसा अद्धा समए'** धर्मास्तिकाय. धर्मास्तिकायस्य देश. धर्मास्तिकायस्य प्रदेशाः अधर्मास्तिकायः अधर्मास्तिकायस्य देशः अधर्मास्तिकायस्य प्रदेशाः, आकाशास्तिकाय· आकाशास्तिकायस्य देशः आकाशास्तिकायस्य प्रदेशा. अद्धासमय इतिच्छाया तत्र जीवाना पुद्गलानां च स्वभावत एव गतिपरिणामपरिणतानां तत्स्वभावधारणात् पोषणात् गतिसाहाय्याद्वा धर्मः, अस्तय. प्रदेशा

भिगमे" પ્રજ્ઞાપના के इस पाठ तक कथन कर लेना चाहिये। प्रज्ञापना का प्रकरण इस प्रकार से है **'धम्मत्थिकाए, धम्मत्थिकायस्स देसे, धम्मत्थिकायस्स पएसा, अधम्मत्थिकाए, अधम्मत्थिकायस्सदेसे, अधम्मत्थिकायस्स पएसा, आगासत्थिकाए, आगासत्थिकायस्सदेसे आगासत्थिकायस्स पएसा, अद्धासमए'** धर्मास्तिकाय धर्मास्तिकायदेश, धर्मास्तिकायप्रदेश, अधर्मास्तिकाय, अधर्मास्तिकायदेश अधर्मास्तिकायप्रदेश आकाशास्तिकाय, आकाशास्तिकायदेश, आकाशास्तिकाय प्रदेश और अद्धासमय। स्वभावत· जीव और पुद्गल ये जब गति क्रिया में परिणत होते हैं– अर्थात् छ द्रव्यो में जीव और पुद्गल ये दो द्रव्य ही ऐसे हैं जो गतिशील है—अत इनमें जब गतिक्रिया होती है, तब धर्मद्रव्य उस क्रिया में इन्हे सहायक होता है। तथा यह असंख्यात प्रदेशों वाला है इसीसे इसे धर्मास्तिकाय द्रव्य कहा गया है। यही बात **'तत्स्वभावधारणात् पोषणात् गतिसाहाय्याद्वा धर्मः'** इत्यादि पंक्तियों द्वारास्पष्ट की गई है। अस्ति नाम प्रदेशों का

अजीवाभिगमे" આ સૂત્રપાઠ પર્યંત કરવું જોઈએ પ્રજ્ઞાપનાસૂત્રમાં આ વિષયને અનુલક્ષીને આ પ્રમાણે કહ્યું છે—**"धम्मत्थिकाए, धम्मत्थिकायस्स देसे, धम्मत्थिकायस्स पएसा, अधम्मत्थिकाए, अधम्मत्थिकायस्स देसे, अधम्मत्थिकायस्स पएसा, आगासत्थिकाए, आगसत्थिकायस्स देसे, आगासत्थिकायस्स पएसा, अद्धासमए'**

અરૂપી અજીવાભિગમના ૧૦ પ્રકાર નીચે પ્રમાણે છે-(૧) ધર્માસ્તિકાય, (૨) ધર્માસ્તિકાય દેશ, (૩) ધર્માસ્તિકાય પ્રદેશ, (૪) અધર્માસ્તિકાય, (૫) અધર્માસ્તિકાય દેશ, (૬) અધર્માસ્તિકાય પ્રદેશ, (૭) આકાશાસ્તિકાય, (૮) આકાશાસ્તિકાયદેશ, (૯) આકાશાસ્તિકાય પ્રદેશ અને (૧૦) અદ્ધાસમય (કાળ)

છ દ્રવ્યોમાંથી જીવ અને પુદ્ગલ, આ બે દ્રવ્યો એવાં છે કે જે ગતિશીલ છે. આ બન્ને દ્રવ્યોની ગતિક્રિયામાં ધર્મદ્રવ્ય સહાયક થાય છે તે દ્રવ્ય અસંખ્યાત પ્રદેશોવાળું હોવાને લીધે જ તેને ધર્માસ્તિકાય કહેવામાં આવ્યુ છે એજ વાત **"तत्स्वभावधारणात् पोषणात् गतिसाहाय्याद्वा धर्मः"** ઈત્યાદિ સૂત્રપાઠ દ્વારા સ્પષ્ટ કરવામાં આવી છે અસ્તિ એટલે પ્રદેશો. આ પ્રદેશોના સમુદાયને અસ્તિકાય કહે છે. ધર્માસ્તિકાયના જે અવિભાજ્ય

स्तेषां कायः-संघातः समुदायः धर्मास्तिकायस्य प्रदेशाः प्रकृष्टा देशा इति प्रदेशाः निर्विभागा अंशा इत्यर्थः तेषां चासंख्यातलोकाकाशप्रदेशप्रमाणत्वात्ते असंख्याताः । एवं धर्मास्तिकायस्य विपक्षोऽधर्मास्तिकायः स च जीवानां पुद्गलानां च स्थितिपरिणामपरिणतनां तदीयपरिणामस्योपष्टम्भकोऽमूर्त्तोऽसंख्यातप्रदेशात्मकः । एतस्यापि देशप्रदेशाः धर्मास्तिकायस्य देशप्रदेशवदेव चिन्तनीयाः । तथा आसमन्तात् सर्वाण्यपि द्रव्याणि जीवादीनि काशन्ते-दीप्यन्ते यत्रेत्याकाशः अस्तयः-प्रदेशाः तेषां कायः-समुदायः इत्यस्तिकाय. आकाशश्च अस्तिकायश्च इत्याकाशास्तिकायः आकाशास्तिकायस्य देशप्रदेशाः धर्मास्तिकायस्य देशप्रदेशवदेव विचारणीयाः किन्तु आकाशास्तिकायस्य प्रदेशा अनन्ता भवन्ति अलोकाकाशस्यानन्तत्वादिति । तथा अद्धासमय इति अद्धेति कालस्य नाम अद्धाचासौ समयश्च इति अद्धासमयः अथवा अद्धायाः समयो निर्विभागो

है। इन प्रदेशों के संघात समुदाय का नाम अस्तिकाय है। धर्मास्तिकाय के जो प्रकृष्ट देश है-निर्विभाग अंश है वे धर्मास्तिकाय प्रदेश है । ऐसे प्रदेश इसमें असंख्यात लोकाकाश प्रदेश प्रमाण है अतः वे असंख्यात है। धर्मास्तिकाय का विपक्ष अधर्मास्तिकाय है। स्थितिरूप परिणाम से परिणत जब जीव और पुद्गल द्रव्य होते हैं-तब यह अधर्मद्रव्य उन्हे उस क्रिया में सहायक होता है यह अमूर्त हैं। तथा असंख्यात प्रदेशों वाला है। धर्मास्तिकाय के जैसा इसके भी देश प्रदेश होते है। समस्त जीवादिक द्रव्य जिसमें प्रकाशित होते है-रहते है-वह आकाश है यह आकाशद्रव्य भी अस्तिकाय कहा गया है क्योकि यह भी प्रदेशों का समुदाय रूप एक द्रव्य है। इसके भी देश और प्रदेश धर्मास्तिकाय के जैसे ही होते है। इसके दो भेद कहे गये है—एक लोकाकाश,और दूसरा आलोकाकाश, जीवादिक छह द्रव्यो का निवास लोकाकाश में ही है आलोकाकाश मे नहीं। अतः लोकाकाश के असंख्यात प्रदेश कहे गये है और आलोकाकाश के अनन्त प्रदेश कहे गये हैं। क्योंकि अलोकाकाश अनन्त है। अद्धा नाम

અંશો છે તેમને ધર્માસ્તિકાયપ્રદેશો કહે છે તેમાં એવા પ્રદેશો અસંખ્યાત લોકાકાશ પ્રદેશ પ્રમાણ છે, તેથી તેઓ અસંખ્યાત છે. ધર્માસ્તિકાયથી વિપરીત લક્ષણવાળું દ્રવ્ય અધર્માસ્તિકાય છે. જ્યારે જીવ અને પુદ્ગલ દ્રવ્ય સ્થિતિ રૂપ પરિણામમાં પરિણત થાય છે ત્યારે અધર્મદ્રવ્ય તેને તે ક્રિયામાં સહાયક બને છે. તે અમૂર્ત છે અને અસંખ્યાત પ્રદેશોવાળું છે. ધર્માસ્તિકાયની જેમ તેને પણ દેશ અને પ્રદેશો હોય છે. સમસ્ત જીવાદિક દ્રવ્ય જેમાં રહે છે, તે આકાશ છે. તે આકાશ દ્રવ્ય પણ પ્રદેશોના સમુદાયરૂપ એક દ્રવ્ય હોવાથી તેને પણ ધર્માસ્તિકાયની જેમ દેશ અને પ્રદેશો હોય છે તેના બે ભેદ કહ્યા છે : (૧) લોકાકાશ અને (૨) અલોકાકાશ જીવાદિક છ દ્રવ્યોનો નિવાસ લોકાકાશમાં જ હોય છે, આલોકાકાશમાં હોતો નથી. તેથી લોકાકાશના અસંખ્યાત પ્રદેશો કહ્યા છે અલોકાકાશના અનંત પ્રદેશો કહ્યા છે, કારણ કે અલોકાકાશ અનંત છે. 'અદ્ધા' નામ કાળનું વાચક છે. અદ્ધા

भाग इति कथनम्। ननु यथा धर्मास्तिकायाधर्मास्तिकाययोर्देशप्रदेशौ कथितौ तथा अद्धासमयस्य देशप्रदेशौ कथं नोक्तौ इति चेत् अत्रोच्यते एकस्यैव वर्तमानकालस्य परमार्थतः सत्त्वम्, अतीतानागतकालयोस्तु विनष्टानुत्पन्नत्वात् ततः कायत्वस्याभावेन देशप्रदेशकल्पना-कल्पस्य न भवति, इति।

ननु कालाकाशौ लोकप्रसिद्धत्वात् स्वीकर्तव्यौ, धर्मास्तिकायाधर्मास्तिकायौ तु लोकप्रसिद्धत्व-विरहात् कथं मन्तव्यौ इति चेत् सत्यम् धर्मास्तिकायाधर्मास्तिकाययोरप्रत्यक्षतया प्रतीति-विषयत्वाभावेऽपि तदीयकार्यस्य गतिस्थितिरूपस्य सर्वसम्मतत्वेन तद्द्वारा तत्कारणयोर्धर्मास्ति-

---

કાય કહ્યા છે. અદ્ધાસમય જો સમય વહ અદ્ધાસમય હૈ અથવા અદ્ધા કા જો સમય વહ અદ્ધા સમય હૈ। સમય નિર્વિભાગ ભાગ રૂપ હોતા હૈ।

શંકા—જિસ પ્રકાર આપને ધર્માસ્તિકાય એવં અધર્માસ્તિકાય કે દેશ ઔર પ્રદેશ કહે હૈ ઉસીપ્રકાર સે અદ્ધાસમય કે દેશ ઔર પ્રદેશ ક્યોં નહીં કહે?

ઉત્તર- પરમાર્થ સે એક હી વર્તમાન કાલકા સત્ત્વ હૈ। વહ વર્તમાન કાલ એક સમય રૂપ હોતા હૈ। અતીત ઔર અનાગતકાલ વિનષ્ટ એવ અનુત્પન્ન હોને સે સત્ત્વ રૂપ નહીં હૈ। ઇસલિયે કાયત્વ કે અભાવ મે દેશ પ્રદેશ કલ્પના કાલ કે નહીં હોતી હૈ।

શંકા—કાલ ઔર આકાશ યે તો લોક મેં પ્રસિદ્ધ હૈં—ઇસલિયે યે તો માને જા સકતે હૈં-પર ધર્માસ્તિકાય ઔર અધર્માસ્તિકાય યે લોક મેં પ્રસિદ્ધ નહીં હૈ। અતઃ લોક મેં ઇનકી પ્રસિદ્ધિ કે અભાવમે ઇન્હેં કૈસે માના જા સકતા?

ઉત્તર— આપકા કહના સત્ય હૈ ધર્માસ્તિકાય ઔર અધર્માસ્તિકાય યદ્યપિ પ્રત્યક્ષ સે પ્રતીતિ મેં નહીં આતે હૈં। પરન્તુ ધર્માસ્તિકાય ઔર અધર્માસ્તિકાય કે કાર્ય જો ગતિસ્થિતિ મેં હેતુ હોના

રૂપ જે સમય તેને અદ્ધાસમય કહે છે અથવા અદ્ધાનો જે સમય તે અદ્ધાસમય છે. સમય નિર્વિભાગ ભાગરૂપ હોય છે

શંકા—આપે જેમ ધર્માસ્તિકાય અને અધર્માસ્તિકાયના દેશ અને પ્રદેશો કહ્યા, તેમ પ્રમાણે અદ્ધાસમયના દેશ અને પ્રદેશો કેમ કહ્યા નથી?

સમાધાન—એક જ વર્તમાનકાળનું જ સત્ત્વ (અસ્તિત્વ) છે. તે વર્તમાનકાળ એક સમય રૂપ હોય છે ભૂતકાળ અને ભવિષ્યકાળ વિનષ્ટ અને અનુત્પન્ન હોવાને કારણે સત્ત્વરૂપ નથી હોતો માટેજ, અતીતને ત્રીજા કાળના દેશ અને પ્રદેશ સંભવી શકતા નથી.

શંકા—કાળ, અને આકાશ, આ બન્ને લોકમા વ્યાપ્ત છે, તેથી તેમના અસ્તિત્વનો સ્વીકાર કરી શકાય છે, પરન્તુ ધર્માસ્તિકાય અને અધર્માસ્તિકાય તો લોકમાં વ્યાપ્ત નથી. તો તેમનું અસ્તિત્વ કેવી રીતે માની શકાય?

સમાધાન— આપની વાત સાચી છે ધર્માસ્તિકાય અને અધર્માસ્તિકાયનો પ્રત્યક્ષ અનુભવ કરી શકાતો નથી પરન્તુ ગતિ અને સ્થિતિમાં મદદ રૂપ થવાનું તેમનું કાર્ય તો સ્પષ્ટ.

कायाधर्मास्तिकाययोरपि अनुमानेन ज्ञातुं शकचत्वात् यथा चक्षुरादीन्द्रियाणामप्रत्यक्षत्वेऽपि रूपादि विज्ञानरूपकार्येण चक्षुरादीनां ज्ञानं भवति तथैव जीवानां पुद्गलानां च गतिस्थितिपरिणामपरिगतानां गतिस्थित्योः कारणतया धर्मास्तिकायाधर्मास्तिकाययोरपि सिद्धिर्भवत्येवेति भावः।

अनेन क्रमेण अरूपि अजीवद्रव्याणि धर्माधर्मास्तिकायाकाशास्तिकायदेशप्रदेशविशिष्ट कालाख्यानि निरूपितानि यथाशास्त्रम्। तदत्रोपसंहारवाक्यम् **'से तं अरूवि अजीवाभिगमे'** इति ॥

अरूप्यजीवं निरूप्य रूप्यजीवं निरूपयितुं प्रश्नयन्नाह—**' से किं तं रूवि'** इत्यादि, **'से किं तं रूवि अजीवाभिगमे'** अथ कोऽसौ रूप्यजीवाभिगमः, इति प्रश्नः, उत्तरयति-'रूवि' इत्यादि **'रूवि अजीवाभिगमे चउव्विहे पण्णत्ते'** रूप्यजीवाभिगमश्चतुर्विधः चतुःप्रकारकः प्रज्ञप्तः-कथितः

रूप है वे सर्व संमत हैं । अतः इनके द्वारा उनका अनुमान प्रमाण द्वारा सत्त्व माना गया है। जिस प्रकार से चक्षु आदि इन्द्रियों का अप्रत्यक्ष होने पर भी रूपादि के ज्ञान होने रूप कार्य से सद्भाव माना जाता है। उसी प्रकार से धर्माधर्मादि द्रव्यों का गतिस्थिति स्वभाव वाले जीव और पुद्गलों की गति और स्थिति में हेतु होने रूप कार्य से अनुमानप्रमाण द्वारा सद्भाव माना गया है। इस क्रम से शास्त्रानुसार अरूपि अजीव द्रव्य का धर्मास्तिकाय, अधर्मास्तिकाय आकाशास्तिकाय का और इनके देश प्रदेश का एवं काल द्रव्य का कथन किया—अब उपसंहार करते हैं–'से तं अरूवि अजीवाभिगमे' स एष अरूप्यजीवाभिगमः, यह अरूपीअजीवाभिगम कहा गया है।

अरूपी अजीव द्रव्यका निरूपण करके अब रूपी अजीव द्रव्य का निरूपण किया जाता है—**'से किं तं रूवि अजीवाभिगमे'** हे भदन्त ! रूपी अजीव द्रव्य कितने प्रकार का है ?

उत्तर—**'रूवि अजीवाभिगमे चउव्विहे पन्नत्ते'** रूपी अजीवाभिगम चार प्रकार का है।

સંમત છે. તેથી આ તેમના કાર્યો દ્વારા અનુમાન પ્રમાણથી તેમનું સત્ત્વ (અસ્તિત્વ) સ્વીકારવામાં આવ્યું છે જેમ ચક્ષુ આદિ ઈન્દ્રિયો અપ્રત્યક્ષ હોવા છતાં પણ રૂપાદિનું જ્ઞાન થવા રૂપ કાર્ય દ્વારા તેમનો સદ્ભાવ માનવામાં આવે છે, એજ પ્રમાણે ધર્મ અને અધર્મ દ્રવ્યોનો, ગતિસ્થિતિ સ્વભાવવાળા જીવો અને પુદ્ગલોની ગતિ અને સ્થિતિમાં કારણરૂપ હોવાથી કાર્ય ને લીધે અનુમાન પ્રમાણ દ્વારા સદ્ભાવ માનવામાં આવ્યો છે. આ પ્રકારે શાસ્ત્રાનુસાર અરૂપી અજીવ દ્રવ્યનું-ધર્માસ્તિકાયનું, અધર્માસ્તિકાયનું, આકાશાસ્તિકાયનું અને તેમના દેશ પ્રદેશોનું તથા કાળદ્રવ્યનું કથન કરવામાં આવ્યું. હવે સૂત્રકાર ઉપસંહાર કરતાં કહે છે કે–"**से त्तं अरूवि अजीवाभिगमे**" આ પ્રકારનું અરૂપી અજીવાભિગમનું સ્વરૂપ છે. એટલે કે તેના દસ પ્રકારોનું વર્ણન અહીં પૂરૂં થાય છે

અરૂપી અજીવ દ્રવ્યોનું નિરૂપણ કરીને હવે સૂત્રકાર રૂપી અજીવ દ્રવ્યોનું નિરૂપણ કરે છે -"**से किं तं रूवि अजीवाभिगमे ?**" હે ભગવન્ ! રૂપી અજીવ દ્રવ્યનું સ્વરૂપ કેવું છે ? તેનો ઉત્તર આ પ્રમાણે આપવામાં આવ્યો છે–"**रूवि अजीवाभिमे चउव्विहे**

रूप्यजीवानां चत्वारो भेदा भवन्तीति भावः । प्रकरणभेदमेव दर्शयति–'तं जहा' इत्यादि, 'तं जहा' तद्यथा **'खधा खंधदेसा खंधप्पएसा परमाणुपोग्गल'** स्कन्धाः अवयविनः स्थूलाः, स्कन्धदेशाः स्कन्धप्रदेशाः परमाणुपुद्गलाः अवयवरूपाः सूक्ष्माः स्कन्धा इत्यत्र बहुवचनं पुद्गलस्कन्धानामन्तरत्वं ज्ञापनाय ।

तदुक्तम्–**'दव्वओ णं पुग्गलत्थिकाए अणंते'** द्रव्यतो द्रव्यरूपेण खलु पुग्दलास्तिकायः अनन्तो भवतीतिच्छाया । स्कन्धानामेव स्कन्धत्वपरिणाममपरित्यजतां केवलबुद्धिपरिकल्पिता द्व्यादि प्रदेशात्मका विभागास्ते एव स्कन्धदेशा इति कथ्यन्ते । इहापि बहुवचनमनन्तप्रदेशिक स्कन्धेषु स्कन्धदेशानामनन्तत्वज्ञापनायेति । स्कन्धप्रदेशाः, स्कन्धानामेव स्कन्धत्वपरिणाममत्यजतां ये प्रकृष्टा देशा निर्विभागा भागास्ते एव स्कन्धप्रदेशाः परमाणव इत्यर्थः, परमाणुपुद्गलाः स्कन्धत्वपरिणामरहिताः केवलाः परमाणवः इति ।

'ते समासओ पंचविहा पन्नत्ता' ते उपरिदर्शिताः स्कन्धस्कन्धदेशस्कन्धप्रदेशपरमाणवः

तं जहा''–जैसे–**'खंधा खंधदेसा खंवप्पएसा परमाणुपोग्गला'** स्कन्ध १ स्कन्धदेश २ स्कन्ध प्रदेश ३ और परमाणुपुद्गल ४ इन में जो स्थूल अवयवी है वे स्कन्ध हैं तथा अवयव रूप जो सूक्ष्म पुद्गल हैं वे परमाणु हैं । स्कन्धो में अनन्तन्ता प्रकट करने के लिये स्कन्ध इस रूप से बहुवचन का प्रयोग किया है ।

कहा भी है–**दव्वओ णं पुग्गलत्थिकाए आणंत्ते'** स्कन्धरूप परिणाम का त्याग किये बिना ही केवल बुद्धि से परिकल्पित जो स्कन्धों के द्व्यादि प्रदेशात्मक विभाग हैं वे स्कन्धदेश हैं । ये स्कन्धदेश भी स्कन्धों में अनन्त होते है । स्कन्धरूप परिणाम का त्याग किये बिना ही जो स्कन्धों के निर्विभाग भाग है वे स्कन्धप्रदेश हैं–स्कन्धत्व परिणाम से रहित जो केवल परमाणुस्वरूप द्रव्य है । वह परमाणुपुद्गल हैं ।

पण्णत्ते'' રૂપી અજીવાભિગમ ચાર પ્રકારનો કહ્યો છે. ''तंजहा'' તે પ્રકારો નીચે પ્રમાણે છે– (खंधा, खंधदेसा, खधप्पएसा, परमाणुपोग्गला'' (૧) સ્કન્ધ, (૨) સ્કન્ધદેશ, (૩) સ્કન્ધપ્રદેશ અને (૪) પરમાણુ પુદ્ગલ જે સ્થૂલ અવયવી છે તેમને સ્કન્ધ કહે છે. અવયવ રૂપ જે સૂક્ષ્મ પુદ્ગલો છે તેમને પરમાણુ કહે છે. સ્કન્ધોમાં અનંતતા પ્રકટ કરવાને માટે ''स्कन्धा'' આ પ્રકારનો બહુવચનવાળો પ્રયોગ કરાયો છે. કહ્યું પણ છે કે–''दव्वओ णं पुग्गलत्थिकाए अणंत्ते'' સ્કન્ધ રૂપ પરિણામનો ત્યાગ કર્યા વિના માત્ર બુદ્ધિથી જ કલ્પવામાં આવેલા સ્કન્ધના બે, ત્રણ આદિ પ્રદેશોવાળા જે વિભાગ છે, તેમને સ્કન્ધદેશ કહે છે. સ્કન્ધોમાં તે સ્કન્ધદેશ પણ અનંત હોય છે સ્કન્ધ રૂપ પરિણામનો ત્યાગ કર્યા વિના જ સ્કન્ધોના જે નિર્વિભાગ ભાગો પડે છે, તેમને સ્કન્ધપ્રદેશો કહે છે. સ્કન્ધત્વ પરિણામથી રહિત એવું જે કેવળ પરમાણુ રૂપ દ્રવ્ય હોય છે, તેને પરમાણુપુદ્ગલ કહે છે. ''ते समासओ पचविहा

समासतः–संक्षेपेण पञ्चविधाः–पञ्चप्रकारकाः प्रज्ञप्ताः कथिताः प्रकारभेदमेव दर्शयति–'तंजहा' तद्यथा **'वण्णपरिणया गंधपरिणया रसपरिणया फासपरिणया संठाणपरिणया'** वर्णपरिणताः, गन्धपरिणताः, रसपरिणताः, स्पर्शपरिणताः, सस्थानपरिणताः, **'एवं ते पंच जहा पण्णवणाए'** एवं ते–उपरि दर्शिताः पञ्च यथा येन रूपेण प्रज्ञापनाया प्रथमपदे प्रदर्शिता स्तथैवात्रापि ज्ञातव्याः तथाहि **'तत्थ णं जे ते वण्णपरिणया ते पंचविहा पण्णत्ता'** तत्र खलु ये वर्णपरिणताः स्कन्धादय स्ते पञ्चविधाः–पञ्चप्रकारका भवन्ति 'तं जहा' तद्यथा **'कालवन्नपरिणया १, नलवन्नपरिणया २, लोहियवन्नपरिणया ३, हालिद्दवन्नपरिणय ४, सुक्किल्लवन्नपरिणया ५,** कालवर्णपरिणताः नीलवर्णपरिणताः, रक्तवर्णपरिणताः, पीतवर्णपरिणताः शुक्लवर्णपरिणताः ५। मधुरादि पञ्चरस-परिणता, गन्धद्वयपरिणताः, कर्कशादयष्टविधस्पर्शपरिणता इत्यादीनां प्रज्ञापनाप्रकरणकथि-

---

'ते समासओ पंचविहा पन्नत्ता'' ये स्कन्ध स्कन्ध देश स्कन्ध प्रदेश और परमाणु संक्षेप से पाँच प्रकार के कहे गये है–'तं जहा'' जैसे **'वण्णपरिणया गंधपरिणया रसपरिणया फास-परिणया संठाणपरिणया'** वर्ण परिणत गन्धपरिणत रस परिणत स्पर्श परिणतऔर संस्थान परिणत **'एवं ते पंच जहा पण्णवणाए''** इस प्रकार जिस रूप से ये पाँच प्रज्ञापना में प्रकट किये गये है उसी रूप से यहाँ पर भी जानना चाहिये अर्थात् **'तत्थ णं जे वण्णपरिणया ते पंचविहा पन्नत्ता''** इनमें जो वर्ण परितणत स्कन्ध आदि हैं। वे कृष्णवर्णपरिणत नीलवर्णपरिणत रक्तवर्णपरिणत, हरिद्वर्ण परिणत एवं शुक्लवर्णपरिणत के भेद से पाँच प्रकार के हैं। रस परिणतस्कन्ध आदि मधुररस परिणत आदि के भेद से पाँच प्रकार के हैं। गंध परिणत स्कन्ध दों प्रकार के हैं। स्पर्शपरिणत स्कन्ध आदि कर्कशस्पर्शादि के भेद से आठ प्रकार के है। इत्यादि सब प्रज्ञ'पना सूत्रका कथन यहाँ संगृहीत हुआ है। **'से तं रूवि अजीवाभिगमे'**

पन्नत्ता'' આ સ્કન્ધ, સ્કન્ધદેશ, સ્કન્ધપ્રદેશ અને પરમાણુના સંક્ષિપ્તમાં પાંચ પ્રકાર કહ્યા છે. ''तंजहा'' જેવાં કે.....''**वण्णपरिणया, गंधपरिणया, रसपरिणया, फासपरिणया, संठाणपरिणया**'' (૧) વર્ણપરિણત, (૨) ગંધપરિણત, (૩) રસપરિણત, (૪) સ્પર્શપરિણત અને (૫) સંસ્થાનપરિણત ''**एवं ते पंच जहा पण्णवणाए**'' પ્રજ્ઞાપનાસૂત્રમાં આ પાંચેની જેવી પ્રરૂપણા કરવામાં આવી છે, એવી જ પ્રરૂપણા અહીં પણ કરવી જોઈએ. એટલે કે ''**तत्थ णं जे वण्णपरिणया ते पचविहा पन्नत्ता**'' તેમાં જે વર્ણપરિણત સ્કંધ આદિ છે તેમના નીચે પ્રમાણે પાંચ ભેદ છે –(૧) કૃષ્ણવર્ણપરિણત, (૨) નીલવર્ણપરિણત, (૩) રક્ત-વર્ણપરિણત, (૪) શુક્લવર્ણપરિણત અને (૫) હરિતવર્ણપરિણત રસપરિણત સ્કન્ધ આદિના મધુરરસપરિણત આદિ પાંચ ભેદ છે. ગંધપરિણત સ્કન્ધ આદિના સુગંધપરિણત અને દુર્ગંધ-પરિણત રૂપ બે ભેદ છે સ્પર્શપરિણત સ્કંધ આદિના કર્કશસ્પર્શપરિણત આદિ આઠ ભેદ છે. આ પ્રકારનું પ્રજ્ઞાપનાસૂત્રનું કથન અહીં ગ્રહણ કરવું જોઈએ. ''**से त्तं रूवि अजीवा-**

'तानां संग्रहः कर्तव्य इति। इदानीं प्रकरणार्थम् उपसंहरन्नाह–''से त्तं रूवि अजीवाभिगमे' सोऽयं रूप्यजीवाभिगमः। 'से त्तं अजीवाभिगमे' सोऽयमजीवाभिगमः कथित इति ॥सू० ५॥

अजीवाभिगमं सक्षेपविस्ताराभ्यां निरूप्य सम्प्रति जीवाभिगमं निरूपयितुमाह–'से किंतं जीवाभिगमे' इत्यादि,

मूलम्—'से किं तं जीवाभिगमे, जीवाभिगमे दुविहे पन्नत्ते, तं जहा संसारसमावन्नग जीवाभिगमे य असंसारसमावन्नग जीवाभिगमे य। से किं तं असंसारसमावन्नगजीवाभिगमे, असंसारसमावन्नगजीवाभिगमे दुविहे पन्नत्ते, तं जहा–अणंतरसिद्धासंसारसमावन्नगजीवाभिगमे य, परंपरसिद्धा संसारसमावन्नगजीवाभिगमे य। से किं तं अणंतरसिद्धा संसारसमावन्नगजीवाभिगमे, अणंतरसिद्धासंसारसमावन्नगजीवाभिगमे पण्णरसविहे पन्नत्ते तं जहा तित्थसिद्धा जाव अणेगसिद्धा से तं अणंतरसिद्धासंसारसमावन्नगजीवाभिगमे से किं तं परंपरसिद्धासंसारसमावन्नगजीवाभिगमे, परंपरसिद्धासंसारसमावन्नगजीवाभिगमे अणेगविहे पन्नत्ते–तं जहा–पढमसमयसिद्धा० दुसमयसिद्धा० जाव अणंतसमयसिद्धा०, से त्तं परंपरसिद्धासंसारसमावन्नगजावाभिगमे, से त्तं असंसारसमावन्नगजीवाभिगमे' ॥ सू० ६ ॥

छाया—अथ कोऽसौ जीवाभिगमः ? जीवाभिगमो द्विविधः प्रज्ञप्तः तद्यथा–संसारसमापन्नकजीवाभिगमश्च असंसारसमापन्नकजीवाभिगमश्च, अथ कोऽसौ असंसारसमापन्नकजीवाभिगमः, असंसारसमापन्नकजीवाभिगमो द्विविधः प्रज्ञप्तः, तद्यथा-अनन्तरसिद्धासंसारसमापन्नकजीवाभिगमश्च, परम्परसिद्धासंसारसमापन्नकजीवाभिगश्च । अथ कोऽसौ अनन्तरसिद्धासंसारसमापन्नकजीवाभिगमः अनन्तरसिद्धासंसारसमावन्नकजीवा-

---

इस प्रकार यह रूपी अजीवाभिगम है।'' से त्तं अजीवाभिगमे'' इस प्रकार से यहाँ तकअजीवाभिगम का कथन किया ॥ सू० ३–४–५ ॥

भिगमे'' આ પ્રકારનુ રૂપી અજીવાભિગમનું સ્વરૂપ છે. ''से त्त अजीवाभिगमे' આ પ્રકારે અહીં સુધી સૂત્રકારે અજીવાભિગમનું નિરૂપણ કર્યું છે ॥ સૂ૦ ૩–૪–૫ ॥

भिगमः पञ्चदशविधः प्रज्ञप्त स्तद्यथा-तीर्थसिद्धा यावत् अनेकसिद्धाः । सोऽयमनन्तरसिद्धासंसारसमापन्नकजीवाभिगमः । अथ कोऽसौ परम्परसिद्धासंसारसमापन्नकजीवाभिगमः, परम्परसिद्धासंसारसमापन्नकजीवाभिगमोऽनेकविध. प्रज्ञप्तः तद्यथा-प्रथमसमयसिद्धा०, द्वितीयसमयसिद्धा० यावदनन्तसमयसिद्धा.०, सोऽयं परम्परसिद्धासंसारसमापन्नकजीवाभिगम । सोऽयमसंसारसमापन्नक जीवाभिगमः ॥ सू० ६ ॥

टीका—अजीवाभिगमं निरूप्य सप्रति जीवाभिगमं निरूपयितुं प्रश्नयन्नाह-'से किं तं इत्यादि 'से किं तं जीवाभिगमे' अथ कोऽसौ जीवाभिगमः किं जीवस्य लक्षणं कियन्तश्च भेदा इति प्रश्नः उत्तरयति-'जीवाभिगमे दुविहे पन्नत्ते' जीवाभिगमो द्विविधः प्रज्ञप्तः यस्य कस्यापि पदार्थस्य यावल्लक्षणं न क्रियते तावत्तद्विभागो न सभवति विभागं प्रति सामान्यधर्मज्ञानस्य कारणत्वादतः प्रथमतो जीवानां लक्षणं कर्त्तव्यम् लक्षणेन जीवस्वरूपेऽधिगते सति तदनन्तरं तद्दीयविभागविषयकजिज्ञासासभवात् तत्रोपयोगवत्त्वं जीवत्वम् इदं च लक्षणमेकेन्द्रियादारभ्य सिद्धपर्यन्त जीववृत्ति तादृशो जीवो द्विविधो द्विप्रकारकः प्रज्ञप्तः-कथित इति प्रकारभेदमेव दर्शयति तं जहा'

संक्षेप विस्तार से अजीवाभिगम का निरूपण करके अब जीवाभिगमका सूत्रकार वर्णन करते हैं। **'से किं तं जीवाभिगमे'—इत्यादि सूत्र ६**

टीकार्थ—'से किं तं जीवाभिगमे' हे भदन्त ! जीवाभिगम का क्या लक्षण है और कितने इसके भेद है ? उत्तर में प्रभु कहते हैं-'जीवाभिगमे दुविहे पन्नत्ते' जीवाभिगम दो प्रकार का है। जब तक किसी भी पदार्थ का लक्षण नहीं किया जाता है तब तक उसका विभाग नहीं होता है, क्योंकि विभाग के प्रति सामान्य धर्मज्ञान कारण होता है। अतः सर्वप्रथम जीवों का लक्षण कहना चाहिये जब लक्षण से जीवस्वरूप अधिगत हो जाता है तभी उसके विभाग के सम्बन्ध की जिज्ञासा उत्पन्न होती है। जो उपयोग वाला होता है वह जीव है। यह जीव का लक्षण है। यह लक्षण एकेन्द्रिय से लेकर सिद्ध तक के समस्त जीवों में पाया जाता

અજીવાભિગમનું સંક્ષિપ્તમાં નિરૂપણ કરીને હવે સૂત્રકાર જીવાભિગમનું નિરૂપણ કરે છે—"से किं तं जीवाभिगमे" ઇત્યાદિ....સૂત્ર ૬

ટીકાર્થ—"से किं तं जीवाभिगमे ?" હે ભગવન્ ! જીવાભિગમનું લક્ષણ શું છે? અને તેના કેટલા ભેદ છે ? મહાવીર પ્રભુનો ઉત્તર—'जीवाभिगमे दुविहे पन्नत्ते" જીવાભિગમના બે પ્રકાર કહ્યા છે જ્યાં સુધી કોઈ પણ પદાર્થનું લક્ષણ જાણવામાં ન આવે, ત્યા સુધી તેના વિભાગ પાડી શકાતા નથી કારણ કે સામાન્ય લક્ષણનું જ્ઞાન જ વિભાગ પાડવામાં મદદરૂપ બને છે. તેથી સૌથી પહેલાં જીવોના લક્ષણનું કથન થવું જોઈએ જ્યારે લક્ષણ દ્વારા જીવના સ્વરૂપને જાણી લેવામાં આવે છે, ત્યારે જ તેના વિભાગ વિષયક જિજ્ઞાસા ઉત્પન્ન થાય છે ઉપયોગ જીવનું લક્ષણ છે. આ લક્ષણ એકેન્દ્રિયથી લઈને સિદ્ધ પર્યન્તના સમસ્ત જીવોમાં જોવામાં આવે છે. આ પ્રકારે જીવનું લક્ષણ પ્રકટ કરીને સૂત્રકાર

इत्यादि तं जहा' तद्यथा **'संसारसमावन्नगजीवाभिगमे य असंसारसमावन्नगजीवाभिगमे'** य ससारसमापन्नकजीवाभिगमश्च असमारसमापन्नकजीवाभिगमश्च ससारी असंसारी इति भेदेन जीवो द्विभेदस्तत्र संसरणं संसारः नारकतिर्यङ्मनुष्यामरभवभ्रमणलक्षणस्तादृशं ससार सम्यगेकीभावे नाप्ताः—प्राप्ता ये जीवास्ते संसारसमापन्नकाः ससारवर्त्तिन इत्यर्थः ससारसमापन्नकाश्च ते जीवा इति ससारसमापन्नकजीवास्तेषां ससारसमापन्नकजीवानामभिगम इति संसारसमापन्नकजीवाभिगमः। तथा न संसारोऽसंसारः ससारश्च नारकतिर्यग्नरामरभवभ्रमणलक्षणस्तद्विरोधी असंसारः अत्र ससारेण समस्य मानस्य न शब्दस्य विरोधोऽर्थः तथा च संसारप्रतिपक्षभूतोऽसंसारो मोक्ष इत्यर्थः तं मोक्षापरपर्यायम् असंसारं समापन्नकाः सम्यगेकीभावेन प्राप्ता इत्यसंसारसमापन्नकाः असंसारसमापन्नकाश्च ते जीवाश्चेत्यससारसमापन्नकजीवास्तेषां जीवानामभिगमोऽससारसमापन्नक जीवाभिगमः। अत्रोभयत्रापि विद्यमानं चकारद्वय संसारसमापन्नकासंसारसमापन्नकोभयेषामपि जीवानां जीवत्वरूपसामान्यधर्मं प्रति तुल्यत्वं दर्शयति—

है। जीवाभिगम के दो प्रकार ये हैं **'संसारसंमापन्नगजीवाभिगमे य असंसारसमापन्नग जीवाभिगमेय'** ससारसमापन्नक जीवाभिगम और असंमारसमापन्नक जीवाभिगम संसारी और असंसारी के भेद से जीव दो प्रकार का कहा गया है। इनमें जो नारक तिर्यञ्च मनुष्य और देव इस रूप ससार में अच्छी तरह प्राप्त है भ्रमण कर रहे हैं वे संसारी जीव हैं। इस संसारी जीवों का जो अभिगम है वह संसारसमापन्नकजीवाभिगम है। चतुर्गति रूप संसार से जो प्रतिपक्ष है वह असंसार है। यह असंसार मोक्ष रूप है। इस मोक्ष रूप असंसार में जो जीव प्राप्त है वे असंसारसमापन्नक हैं। इनका जो अभिगम है वह असंसारसमापन्नक जीवाभिगम हैं। यहाँ सूत्र में दो चकारो का पाठ आया है वह संसारसमापन्नक जीवों में और असंसारसमापन्नक जीवों में दोनों में जीवत्वरूप सामान्यधर्म के प्रति तुल्यता

જીવાભિગમના નીચે પ્રમાણે બે પ્રકાર બતાવે છે—"संसारसमापन्नगजीवाभिगमे य, असंसारसमापन्नगजीवाभिगमे य" (૧) સંસાર સમાપન્નક જીવાભિગમ અને (૨) અસંસાર સમાપન્નક જીવાભિગમ. એટલે કે સંસારી અને અસંસારીના ભેદથી બે પ્રકારના જીવો કહ્યા છે. નારક તિર્યંચ, મનુષ્ય અને દેવ રૂપ સંસારમાં ભ્રમણ કરનારા જીવોને સંસારી જીવો કહે છે. આ સંસારી જીવોનો જે અભિગમ છે તેને સંસાર સમાપન્નક જીવાભિગમ કહે છે. ચાર ગતિરૂપ સંસારના પ્રતિપક્ષનું નામ અસંસાર છે આ અસંસાર મોક્ષરૂપ છે. આ મોક્ષરૂપ અસંસારમાં પહોંચી ચુકેલા જીવોને અસંસારસમાપન્નક કહે છે. તેમનો જે અભિગમ છે તેનુ નામ અસંસારસમાપન્નક જીવાભિગમ છે આ સૂત્રમાં બે વાર 'च' નો પ્રયોગ કરીને સૂત્રકારે સંસારસમાપન્નક જીવોમાં અને અસંસાર સમાપન્નક જીવોમાં-બન્નેમા-જીવત્વરૂપ સામાન્ય ધર્મની બાબતમાં તુલ્યતા પ્રકટ કરી છે.

अयं भावः उपयोगवत्त्वलक्षणजीवत्वं यथा–संसारिजीवेषु विद्यते तथा–मुक्तजीवेष्वपि वर्तते एवेति उपयोगवत्त्व लक्षणजीवत्वमुभयत्रापि समानरूपमेवेति। संसार्यससारिणोरुभयोरपि जीवयोरुपयोग-वत्त्वात्मक जीवत्वस्य समानतया कथनेन बौद्धमतं न्यायमतं च प्रतिक्षिप्त भवति तथाहि- बौद्धोहि क्षणिकविज्ञानरूपं जीवमभ्युपगच्छति यावत्संसार क्षणिकविज्ञानधारासन्तानरूपेण प्रवहति तत्त्वज्ञानेन यदा सा धारा विच्छिद्यते तदा विज्ञानधारा समुच्छेदरूपा मुक्तिर्भवति मुक्तजीवे विज्ञानं न भवति इति तन्मतं निराकृतमाचार्येण उभयोरेकरूपत्वकथनेन यदा उपयोगमात्रं जीवस्य-स्वरूपम् तदा को हि बुद्धिमान् पुरुष· स्ववधाय प्रयत्नं कुर्यात् सर्वोऽपि कर्मसंप्राप्तदुःखं निवर्तयितु यतते न तु स्वकीयस्वरूपविनाशाय क.प्रेक्षावान् स्वविच्छेदाय कुठारं व्यापारयति यदि मोक्षे स्व-

---

પ્રકટ કરતા હૈ। અર્થાત્ ઉપયોગ લક્ષણ યુક્તતા જીવત્વ કા સામાન્ય લક્ષણ હૈ। યહ લક્ષણ જિસ પ્રકાર સે સસારી જીવોં મેં પાયા જાતા હૈ ઉસી પ્રકાર સે વહ મુક્ત જીવો મેં ભી પાયા જાતા હૈ। અત· લક્ષણ કી તુલ્યતા દોનોં મેં હૈ। ઇસ ઉપયોગ લક્ષણ કી તુલ્યતા કે કથન સે બૌદ્ધમત ઔર ન્યાયમત–નૈયાયિક મતકા નિરસન (ખણ્ડન) હો જાતા હૈ–જૈસે–બૌદ્ધ ને "ક્ષણિક વિજ્ઞાન રૂપ જીવ હૈ" ઐસા માના હૈ। જબતક સસાર હૈ–તબ તક ક્ષણિક વિજ્ઞાન ધારાસન્તાન રૂપ સે ચલતી રહતી હૈ। તત્ત્વજ્ઞાન સે વહ ધારા જબ વિચ્છિન્ન હો જાતી હૈ તબ વિજ્ઞાન ધારા કે સમુચ્છેદ હોને રૂપ મુક્તિ જીવ કી હો જાતી હૈ। મુક્તિ મેં મુક્ત જીવ કો જ્ઞાન નહીં રહતા હૈ। ઇસ બૌદ્ધ કી માન્યતા મેં અસમીચીનતા કહતે હુએ આચાર્ય કહતે હૈ કિ જીવ કા લક્ષણ હી જબ ઉપયોગરૂપ હૈ તો કૌન બુદ્ધિમાન્ પુરુષ અપને હી વધ કે લિયે પ્રયત્ન કરેગા–સમસ્ત જીવ કર્મસંપ્રાપ્ત દુઃખ કો દૂર કરને કે લિયે પ્રયત્ન કરતે હૈ અપને સ્વરૂપ કો નષ્ટ કરને કે લિયે પ્રયત્ન નહીં કરતે હૈં। યદિ મોક્ષ મેં સ્વ–સ્વરૂપ હી નષ્ટ હો જાતા હો તો

એટલે કે ઉપયોગ લક્ષણસંપન્નતા જીવત્વનું સામાન્ય લક્ષણ છે. આ લક્ષણનો જેમ સંસારી જીવોમાં સદ્ભાવ હોય છે, એજ પ્રમાણે મુક્તજીવોમાં પણ સદ્ભાવ હોય છે. આ રીતે બન્નેમાં લક્ષણની સમાનતા છે આ ઉપયોગલક્ષણની તુલ્યતાના કથન દ્વારા બૌદ્ધ-મત અને નૈયાયિકમતનું ખંડન થઈ જાય છે. બૌદ્ધો એવું માને છે કે "ક્ષણિક વિજ્ઞાન રૂપ જીવ છે." જ્યાં સુધી સંસાર છે ત્યાં સુધી ક્ષણિક વિજ્ઞાનધારા સન્તાનરૂપે ચાલુ રહે છે. તત્ત્વજ્ઞાન વડે જ્યારે તે ધારા વિચ્છિન્ન થઈ જાય છે, ત્યારે વિજ્ઞાનધારાના સમુચ્છેદરૂપ મુક્તિની જીવને પ્રાપ્તિ થાય છે. મુક્તિ પ્રાપ્ત કર્યા બાદ મુક્ત જીવમાં જ્ઞાન રહી શકતું નથી. બૌદ્ધોની આ માન્યતા બરાબર નથી એવું પ્રતિપાદન કરવા નિમિત્તે આચાર્ય કહે છે કે–જેમ જીવ ઉપયોગરૂપ લક્ષણવાળો છે, તો કયો બુદ્ધિમાન્ પુરુષ પોતાના જ વધને માટે પ્રયત્ન કરશે? સમસ્ત જીવો કર્મના ઉદયને લીધે જે દુઃખો આવી પડે છે. તેમને દૂર કરવાનો પ્રયત્ન કરે છે—કોઈ પણ જીવ પોતાના સ્વરૂપનો નાશ કરવાનો પ્રયત્ન કરતો નથી. જો મોક્ષમાં સ્વસ્વરૂપનો જ નાશ થઈ જતો હોય, તો તેની પ્રાપ્તિને માટે પ્રયત્ન

